# Shri Stambhavirbhava Narasimha Stotram

# श्रीस्तम्भाविर्भावनरसिंहस्तोत्रम्

## Document Information

Text title : Stambhavirbhava Narasimha Stotram

File name : stambhAvirbhAvanarasiMhastotram.itx

Category : vishhnu

Location : doc_vishhnu

Acknowledge-Permission: shrIchakravartula sudhanvAchArya

Latest update : April 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 22, 2021

*sanskritdocuments.org*

# श्रीस्तम्भाविर्भावनरसिंहस्तोत्रम्

सहस्रभास्करस्फुरत्प्रभाक्षदुर्निरीक्षणं
प्रभग्नक्रूरकृद्धिरण्यकश्यपोरुरस्थलम् ।
अजस्रजाण्डकर्परप्रभग्नरौद्रगर्जन-
मुदग्रनिग्रहाग्रहोग्रविग्रहाकृतिं भजे ॥ १॥

स्वयम्भुशम्भुजम्भजित्प्रमुख्यदिव्यसम्भ्रमं
द्विजृम्भमध्यदुत्कटोग्रदैत्यकुम्भकुम्भिनिन्- ।
-अनर्गलाट्टहासनिस्पृहाष्टदिग्गजार्भटिन्
युगान्तिमान्तमत्कृतान्तधिक्कृतान्तकं भजे ॥ २॥

जगज्ज्वलद्दहद्ग्रसत्प्रहस्फुरन्मुखार्भटिं
महद्भयद्भवद्दहग्रसल्लसत्कृताकृतिम् ।
हिरण्यकश्यपोसहस्रसंहरत्समर्थकृ-
-न्मुहुर्मुहुर्मुहुर्गलध्वनन्नृसिंह रक्ष माम् ॥ ३॥

दरिद्रदेवि दुष्टदृष्टि दुःख दुर्भरं हरं
नवग्रहोग्रवक्रदोषणादिव्याधि निग्रहम् ।
परौषधादिमन्त्रयन्त्रतन्त्रकृत्रिमंहनं
अकालमृत्युमृत्युमृत्युमुग्रमूर्तिणं भजे ॥ ४॥

जयत्यवक्रविक्रमक्रमक्रमक्रियाहरं
स्फुरत्सहस्रविस्फुलिङ्गभास्करप्रभाग्रसत् ।
धगद्धगद्धगल्लसन्महद्भ्रमत्सुदर्शनो-
न्मदेभभित्स्वरूपभृद्भवत्कृपारसामृतम् ॥ ५॥

विपक्षपक्षराक्षसाक्षमाक्षरूक्षवीक्षणं
सदाऽक्षयत्कृपाकटाक्षलक्ष्मलक्ष्मिवक्षसम् ।
विचक्षणं विलक्षणं प्रतीक्षणं परीक्षणं
परीक्ष दीक्ष रक्ष शिक्ष साक्षिणं क्षमं भजे ॥ ६॥

अपूर्व शौर्य धैर्य वीर्य दुर्निवार्य दुर्गम-
मकार्यकृद्धनार्य गर्वपर्वतप्रहार्यसत् ।
प्रचार्यसर्वनिर्वहस्तुपर्यवर्यपर्विणं
सदार्यकार्यभार्यभृद्दुदारवर्यणं भजे ॥ ७॥

प्रपत्तिनार्द्रनाभनाभिवन्दनप्रदक्षिणा
नताननाङ्गवाङ्मनःस्मरज्जपस्तुवद्गदा ।
अश्रुपूर्णार्द्रपूर्णभक्तिपारवश्यता
सकृत्क्रियाचरद्धवत्कृपा नृसिंह रक्ष माम् ॥ ८॥

करालवक्र कर्कशोग्र वज्रदंष्ट्रमुज्ज्वलं
कुठारखङ्गकुन्तरोमराङ्कुशोन्नखायुधम् ।
महद्भयूधभग्नसञ्चलज्ञता सटालकं
जगत्प्रमूर्छितात्टहासचक्रवर्तिणं भजे ॥ ९॥

नवग्रहाऽपमृत्युगण्ड वास्तुरोग वृश्चिका-
-ऽग्नि वाडवाग्नि काननाग्नि शतृमण्डल ।
प्रवाह क्षुत्पिपास दुःख तस्कर प्रयोग दु-
-ष्प्रमादसङ्कटात्सदा नृसिंह रक्ष मां प्रभो ॥ १०॥

फलश्रुति समर्पणम् ।
इदं नृसिंह स्तम्भ सम्भ वावतारसंस्तवं
वराकलङ्क वंश्य वेङ्कटाभिधान वैष्णवो ।
समर्पितोऽस्मि सर्वदा नृसिंह दास्यतेच्छया
रमाङ्क यादशैलनारसिंह तेङ्घ्रिसन्निधौ ॥ ११॥

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युर्नमाम्यहम् ॥

इति श्रीवेङ्कटरमणाचार्यविरचितं
स्तम्भाविर्भावनरसिंहस्तोत्रं सम्पूर्णम् ।

The text is provided by shrIchakravartula sudhanvAchArya,
the grandson of the composer, Shri Venkataramana

*Shri Stambhavirbhava Narasimha Stotram*

pdf was typeset on April 22, 2021

Please send corrections to *sanskrit@cheerful.com*